# Appendix - 01

# Interpolated passages (marked with * sign in the text of *Sārasvata-prakriyā*)

१.[१२४]

अम्बादीनामिति कोऽर्थः । अर्थवाचकानां जननीवाचकानां द्विस्वराणां शब्दनां धौ परे ह्रस्वो भवति । डलकवतीनां न । डलकवतीनां अम्बादीनां धौ परे ह्रस्वो न भवति । असंयोगा डलका ग्राह्याः । असंयोगा इति किम् । हे अम्बाडे हे अम्बाले हे अम्बिके ।

२.[१२८]

गौरी गौर्यौ गौर्यः । हे गौरि हे गौर्यौ हे गौर्यः । गौरीम् गौर्यौ गौरीः इत्यादि । गौतमी गौतम्यौ गौतम्यः । हे गौतमि । सरस्वती सरस्वत्यौ सरस्वत्यः । हे सरस्वति । ब्रह्माणी ब्रह्माण्यौ ब्रह्माण्यः हे ब्रह्माणि । कुमारी कुमार्यौ कुमार्यः । हे कुमारि । मधुमती मधुमत्यौ मधुमत्यः । है मधुमति इत्यादि । क्रोष्टुः स्त्रियां तृवद्भावः स्यात् । तेन क्रोष्ट्री क्रोष्ट्र्यौ क्रोष्ट्र्यौः । क्रोष्ट्रीम् शेषं नदीवत् । हे क्रोष्ट्रि हे क्रोष्ट्र्यौ हे क्रोष्ट्र्यः इत्यादि ।

३.[१३१]

भूः भुवौ भुवः । भुवम् भुवौ भुवः । भुवा भूभ्याम् भूभिः । भुवै - भुवे भूभ्याम् भूभ्यः । भुवाः - भुवः भूभ्याम् भूभ्यः । भुवाः - भुवः भुवोः भुवाम् - भूनाम् । भुवाम् - भुवि भुवोः भूषु । हे भूः हे भुवौ हे भुवः । एवं भ्रूशब्दः । भ्रूः भ्रूवौ भ्रुवः । भ्रुवम् भ्रुवौ भ्रुवः । भ्रुवा भ्रूभ्याम् भ्रूभिः । भ्रुवाः - भ्रुवः भ्रुवोः भ्रुवाम् - भ्रूणाम् । भ्रुवाम् - भ्रुवि भ्रुवोः भ्रूषु । हे भ्रूः हे भ्रुवो हे भ्रुवः । एवं सुभ्रूशब्दः । सुभ्रूः सुभ्रुवौ सुभ्रुवः । सुभ्रुशब्दस्य धौ ह्रस्व इति केचित् । हे सुभ्रूः - हे सुभ्रु हे सुभ्रुवौ हे सुभ्रुवः ।

४.[१५३]

भारवाह्शब्दस्य भेदः । हो ढः (सू॰१५२) वावसाने (सू॰१५१) । भारवाट् भारवाड् भारवाहौ भारवहः । भारवाहम् भारवाहौ । वाहौ वौ शसादौ स्वरे । वाहः वः औ शसादौ स्वरे । वाहो वाकारस्यौकारदेशो भवति शसादौ स्वरे परे । भारौहः । भारौहा भारवाड्भ्याम् भारवाड्भिः । श्वेतवाहुक्थशास् पुरोडाश् अवयाजां डस् रसे पदान्ते चेति वक्तव्यम् । डित्वाट्टिलोपः । अत्वसोः सौ (सू॰१८२) श्वेतवाः श्वेतवाहौ श्वेतवाहः । श्वेतवाहम् श्वेतवाहौ श्वेतवाहः । अत्र वाहो वौ शसादौ स्वरे वेति केचित् । श्वेतौहः ।

श्वेतौहा - श्वेतवाहा श्वेतवोभ्याम् श्वेतवोभिः । श्वेतौहे - श्वेतवाहे श्वेतवोभ्याम् श्वेतवोभ्यः । श्वेतौहः - श्वेतवाहः श्वेतवोभ्याम् श्वेतवोभ्यः । श्वेतौहः श्वेतवाहः श्वेतौहोः - श्वेतवाहोः श्वेतौहाम्- श्वेतवाहाम् । श्वेतौहि - श्वेतवाहि श्वेतौहोः श्वेतवाहोः श्वेतवः सु -श्वेतवस्सु । अवयाः श्वेतवाः पुरोडाश्चैते कृतदीर्घाः संबुद्धौ निपात्यन्ते । चकारदुक्थशा इति केचित् । हे श्वेतवाः वेति केचित् । हे श्वेतवः हे श्वेतवाहौ हे श्वेतवाहः । श्वेतमासनं वहतीति श्वेतवाः इति व्युत्पत्तिः । उक्थशाः उक्थशासौ उक्थशासः । उक्थशासम् उक्थशासौ उक्थशासः । उक्थशासा उक्थशोभ्याम् उक्थशोभिः । उक्थशासे उक्थशोभ्याम् उक्थशोभ्यः । उक्थशःसु - उक्थशस्सु । हे उक्थशाः हे उक्थशः हे उक्थशासौ हे उक्थशासः इत्यादि । पुरोडाः पुरोडाशौ पुरोडाशः । पुरोडाशम् पुरोडाशौ पुरोडाशः । पुरोडाशा पुरोडाभ्याम् पुरोडोभिः । पुरोडाशे पुरोडोभ्याम् पुरोडोभ्यः । पुरोडोःसु - पुरोडस्सु । हे पुरोडाः - हे पुरोडः हे पुरोडाशौ हे पुरोडाशः। अवयाः अवयाजौ अवयाजः । अवयाजाम् अवयाजौ अवयाजः । अवयाजा अवयोभ्याम् अवयोभिः । अवयाजे अवयोभ्याम् अवयोभ्यः । अवयःसु- अवयस्सु । हे अवयाः हे अवयः हे अवयाजौ हे अवयाजः तुरासाह्शब्दस्य भेदः । हो ढः (सू° १५२) । सहेः षः साढि । सहेः सकारस्य षकारादेशो भवति साढि सति । वावसाने (सू° १५१) । तुराषाट् - तुराषाड् तुरासाहौ तुरासाहः । तुरासाहम् तुरासाहौ तुरासाहः । तुरासाहा तुराषाड्भ्याम् तुराषाड्भिः । तुरासाहे तुराषाड्भ्याम् तुराषाड्भ्यः इत्यादि । हे तुराषाट् - हे तुराषाड् हे तुरासाहौ हे तुरासाहः ।

५.[१५५]

रः सुपि । सप्तमीबहुवचने रोरेव विसर्जनीयो नान्यरेफस्य । चतुर्षु । अत्र ज्ञापकं यक्चतुर्ष्विदं सूत्रम् । तदन्तविधिश्चिरत्रेष्यते । प्रियश्चत्वारो यस्य सः प्रियचत्वाः प्रियचत्वारौ प्रियचत्वारः । प्रियचत्वारम् प्रियचत्वारौ प्रियचतुरः । प्रियचतुरा प्रियचतुर्भ्याम् प्रियचतुर्भिः । गौणत्वे नुट् नेष्यते । प्रियचतुराम् । प्राधान्ये तु स्यादेव । परमचतुर्णाम् । धावम् (सू° १४७) । चतुर्शब्दस्य धौ परे अमागमो भवति । हे प्रियचत्वः हे प्रियचत्वारौ हे प्रियचत्वारः ।

६.[१५६]

आत्मा आत्मानौ आत्मानः । आत्मानम् आत्मानौ आत्मनः । आत्मना आत्मभ्याम् आत्मभिः इत्यादि । हे आत्मन् हे आत्मानौ हे आत्मनः । सुधर्मा सुधर्माणौ सुधर्माणः। हे सुधर्मन् हे सुधर्मणौ हे सुधर्माणः । सुधर्माणम् सुधर्माणौ सुधर्मणः । सुधर्मणा सुधर्मभ्याम् सुधर्मभिः इत्यादि ।

७.[१५७]

हे मघवन् हे मघवानौ हे मघवानः । मघवा बहुलम् । मघवन्शब्दस्य वा तृ इत्यन्तादेशः

स्यात् । ऋकारो रित्कार्यर्थिः । बहुलग्रहणात्सर्गे विधयो व्यभिचरन्ति। व्रितो नुम् (सू° १८०) माघवान् । नश्चापदान्ते झसे (सू° ५२) मघवन्तौ मघवन्तः । मघवन्तम् मघवन्तौ मधवन्तः । मघवता मघवद्भ्याम् मधवद्भिः । मघवते मघवदभ्याम् मघवद्भ्यः । इत्यादि । हे मघवन् हे मघवन्तौ हे मघवन्तः । "स किल सयूर्गमूर्ध्नि सहायतां मघवतः प्रतिपद्य महारथः" इति प्रयोगदर्शनात् । अर्वणस्त्रसावनञः नञ्वर्जस्यार्वणस्तृ इत्यन्तादेशः । स्यादसौ विभक्तौ परतः । अर्वा अर्वन्तौ अर्वन्तः । अर्वन्तम् अर्वन्तौ अर्वतः । अर्वता अर्वद्भ्याम् अर्वद्भिः । अर्वते अर्वद्भ्याम् अर्वद्भ्यः इत्यादि । हे अर्वन् हे अर्वन्तौ हे अर्वन्तः । नञ्वर्जस्येति किम् । नोपधायाः (सू.१३६) अनर्वा अनर्वाणौ अनर्वाणः अनर्वाणम् अनर्वाणौ अनर्वणः । अनर्वणा अनर्वभ्याम् अनर्वभिः । अनर्वसु इत्यादि ।

८.[१६७]

गौणत्वेऽपि आत्वं जश्शसौर्डौत्वं वेत्येके । प्रियाष्टा - प्रियाष्टाः प्रियाष्टानौ - प्रियाष्टौ प्रियाष्टानः प्रियाष्टौ - प्रियाष्टाः । प्रियाष्टानम् - प्रियाष्टाम् । प्रियाष्टानौ - प्रियाष्टौ प्रियाष्ट्रः - प्रियाष्टौ - प्रियाष्टान् प्रियाष्टाः । प्रियाष्ट्रा - प्रियाष्टा प्रियाष्टाभ्याम् - प्रियाष्टभ्याम् प्रियाष्टाभिः - प्रियाष्टभिः । प्रियाष्ट्रे प्रियाष्टै प्रियाष्टाभ्यां - प्रियाष्टभ्याम् प्रियाष्टाभ्यः - प्रियाष्टभ्यः । प्रियाष्ट्रः - प्रियाष्टाः प्रियाष्ट्रोः प्रियाष्टौः प्रियाष्टाम् - प्रियाष्टनाम् । प्रियाष्ट्नि - प्रियाष्टनि - प्रियाष्टे प्रियाष्ट्नोः - प्रियाष्टौ प्रियाष्टासु - प्रियाष्टसु । हे प्रियाष्टन् - हे प्रियाष्टाः हे प्रियाष्टानौ - हे प्रियाष्टौ हे प्रियाष्टानः - हे प्रियाष्टौ - हे प्रियाष्टाः ।

जसि त्रीण्येव रुपाणिं शसि चत्वारि वै पुनः ।
ङावपि त्रीणि रुपाणि शेषे द्वे द्वे प्रियाष्टनः ॥

९.[१७५]

युजेरसमासे । युजेः सुटि नुम् स्यादसमासे । क्विन्प्रत्ययस्य कुः । क्विन्नन्तस्य धातोः कवर्गान्तादेशः स्यादसमासे झलि पदान्ते च । प्रत्ययशब्देन प्रत्ययान्तस्य ग्रहणम् । युङ् । अनुस्वारपरसवर्णौ । युंजौ युंजः । युंजम् युंजौ युजः । युजा युग्भ्याम् युग्भिः । युजे युग्भ्याम् युग्भ्यः । चोः कुः (सू° १७७) खसे चपा (सू° ५०) क्विलात् (सू° ८१) कषसंयोगे क्षः यक्षु । हे युङ् हे युञ्जौ हे युञ्जः इत्यादि । असमासे किम् । अश्वयुक् - अश्वयुग् अश्वयुजौ अश्वयुजः । अश्वयुजम् अश्वयुजौ अश्वयुजः । अश्वयुजा अश्वयुग्भ्याम् अश्वयुग्भिः इत्यादि । समाध्यर्थस्य युजेर्न नुम् । युक् समाधिमानित्यर्थः । दकारान्तो द्विपाद्शब्दः । द्विपाद् - द्विपात् द्विपादौ द्विपादः । द्विपादम् द्विपादौ । पादः पत् । पाद्शब्दस्य पदादेशः स्याच्छसादौ स्वरे परे तद्धिते ईपि ईकारे च । द्विपदः । द्विपदा द्विपाद्भ्याम् द्विपाद्भिः । द्विपदे द्विपाद्भ्याम् द्विपाद्भ्यामः इत्यादि । हे द्विपात् - हे द्विपाद् हे द्विपादौ हे द्विपादः ।

१०.[१७८]

नाञ्चेः पूजायाम् (पा° सू° ६/४/३०) । पूजार्थस्याञ्चतेरुपधाभूतस्य नस्य लोपो न स्यात् । अलुप्तनकारत्वान्न नुम् । क्विन्प्रत्ययस्य कुः । संयोगान्तस्य लोपः (सू° १४६) प्रत्यङ् प्रत्यञ्चौ प्रत्यञ्चः । प्रत्यञ्चम् प्रत्यञ्चौ । नलोपाभावादकारस्यालोपः । प्रत्यञ्चः । प्रत्यञ्चा प्रत्यङ्भ्याम् प्रत्यङ्भिः इत्यादि । ङ्णोः कुक् टुक् शरि (पा° सू° ८/३/२८) । वा ङकारणकारयोः कुक्टुकावागमौ वा स्तः शरि परे । प्रत्यक्षु - प्रत्यङ्षु ।

११.[१७९]

विष्वग्देवयोश्चटेरद्र्यञ्चतौ वप्रत्यये । अनयोः सर्वनाम्नश्च टेरद्र्यादेशः स्याद्वप्रत्ययान्तेऽञ्चतौ परे । अमुम् अञ्चतीति विग्रहे । अदसष्टेरद्र्यादेशः । अदसोऽसेर्दादु दो मः (पा° सू° ८/२/८०) । अदसोऽसान्तस्य दात्परस्य उदूतौ स्तो दस्य च मः स्यात् । अदमुयङ् अमुद्र्यङ् अमुमुयङ् अदद्र्यङ् ।

परतः केचिदिच्छन्ति केचिदिच्छन्ति पूर्वतः ।
उभयोः केचिदिच्छन्ति केचिदिच्छन्ति नोभयोः ॥

विष्वद्र्यङ् देवद्र्यङ् । उदङ् उदञ्चौ उदञ्चः । उदञ्चम् उदञ्चौ । उद ईति् । उच्छब्दापरस्य लुप्तनकारस्याञ्चतेरकारस्येकारादेशो भवति शसादौ स्वरे परे तद्धिते ईपि ईकारे च ।

१२.[१८१]

न्सन्तस्येत्यागमजनकारयुक्तसान्तस्य ज्ञेयम् । तेन कंस्शब्दस्य क्विबन्तस्य न दीर्घः । संयोगान्तस्य लोपः (सू° १४६) । कन् कंसौ कंसः । कंसम् कंसौ कंसः । कंसा कन्भ्याम् कन्भिः । कन्सु । हे कन् । शोभना आपो यस्मिन्नसौ स्वाप् स्वाव् स्वापौ स्वापः । स्वांपि तडागानि ।

१३.[१८२]

असन्तस्येत्सुप्रत्ययान्तस्येति विवक्षितम् । तेन पिण्डं ग्रसतीति पिण्डग्रः । पिण्डग्रसौ पिण्डग्रसः । पिण्डग्रसम् पिण्डग्रसौ पिण्डग्रसः इत्यादि ।

१४.[१८२]

द्विरुक्तानां जक्षादीनां च शतुर्नुम् प्रतिषेधः पुंल्लिङ्गे नित्यं वक्तव्यो नपुंसके वा शौ च । दधत् - दधद् दधतौ दधतः । दधतम् दधतौ दधतः । दधता दधद्भ्याम् दधद्भिः इत्यादि । नपुंसके दधत् - दधद् दधती दधति - दधन्ति । जक्ष जागृ दरिद्रा शास् दीधी वेवी चकास् एते जक्षादयः ।

१५.[१८३]

षष् सु इति स्थिते । षो डः (सू° १७५) खसे चपा (सू° ५०) इति टकारे कृते । इत्यत्र

ष्टुभिः ष्टुः (सू॰ ४३) इति सकारस्य षत्वे प्राप्ते पदान्तताश्रयणीया । टोरन्त्या (सू॰ ४५) दिति ष्टुत्वनिषेधः ।

१६. [१८३]

य्वोर्वि हसे (सू॰ १९७) इति सिद्धे इदं न वक्तव्यम् । अथवा तस्यैवेदं सूचकम् ।

१७. [१८४]

दोष् सु इति स्थिते दोषाम् (सू॰ १८४) इति विसर्गः । शषसे वा । इति सत्वे कृते क्विलात् (सू॰ ८१) इति षत्वम् । नुम् विसर्जनीयशस्व्यवधानेऽपि क्विलादिति सस्य षत्वं वाच्यम् । कृताकृतप्रसंगी यो विधिः स नित्यः ।

१८.[१८५]

रेफः स्वरपरं वर्णं दष्ट्वाऽऽरोहति तच्छिरः ।
पुरः स्थितं यदा पश्येदधः संक्रमते स्वरम् ॥
अनुस्वारो नमस्यैव यावत्तद्देशयोर्गतः ।
मूर्द्ध्निसङ्गं लभेतावन्नेक्षते पुरतः स्वरम् ॥

अनुस्वारस्य मकारो भवति स्वरे परे ।

१९.[१८६]

ननु पुंक्ष्वित्यत्र मकार एव संयोगादिर्न सकारस्तर्हि कथं लोपः । पुंक्षु अत्र स्कोराद्येश्चेत्यनेन संयोगाद्यस्य लोपे प्राप्ते मकारस्यैव लोपो भवेन्न तु सकारस्य । आदित्वाभावात् । संयोगाद्यस्तु पुंस् इत्यत्र शिरसि मकार एव । तस्मादादित्वं द्विविधम् । मुख्यत्वमापेक्षिकत्वं च । अत्र सस्यादित्वमापेक्षिकम् । पुंस् क इत्यत्र ककारापेक्षया सकार आदिः सकारापेक्षया मकार आदिरिति सकारस्यैव लोपः ।

२०.[१८७]

तद्धिते वैदुष्यम् । एवं तस्थिवस्प्रभृतयः । तस्थिवान् तस्थिवांसौ तस्थिवांसः । तस्थिवांसम् तस्थिवांसौ । निमित्ताभावे नैमित्तिकस्याप्यभावः । इटो वकारमुद्दिश्य प्राप्तत्वाद्वस्योत्वे तन्निवृत्तिः । आतोऽनपि (सू॰ ३७२) इत्यालोपः । तस्थुषः ।

२१.[१९६]

स्त्रियामिति त्रिचतुरोर्विशेषणात्स्त्रियां गौणयोर्नैतावादेशौ स्तः । प्रियास्त्रयस्त्रीणि वा यस्याः सा प्रियत्रिः । प्रियत्री प्रियत्रयः । बुद्धिवत् । यदा स्त्रियं मुख्यौ लिङ्गान्तरे

गौणौ तदादेशौ स्त एव । प्रियास्तिस्रो यस्य सः प्रियतिसा । सेरा (सू°११२) । प्रियातिस्रो प्रियतिस्रः । प्रियतिस्रम् प्रियतिस्रो प्रियतिस्रः । प्रियतिस्रा प्रियतिसृभ्याम् प्रियतिसृभिः । प्रियतिसृषु । क्लीबे प्रियास्तिस्रो यस्य तत्प्रियतिसृ प्रियतिसृणी प्रियतिसृणि । एवं प्रियाश्चतस्रो यस्य सः प्रियचतस्रा प्रियचतस्रौ प्रियचतस्रः । क्लीबे । प्रियचतसृ प्रियचतसृणी प्रियचतसृणि ।

२२.[१९९]

अबादीनामित्यादिग्रहणं गौणत्वेऽपि दत्वार्थम् । अप्शब्दस्य पञ्चसु यद्रूपं तत् स्वप्शब्दस्य रूपम् । अबादीनामित्यत्र अपः पाठे अप् शब्दस्यैव वक्तव्ये अपामित्यत्र बहुवचनात् अप् स्वप् बह्वप् एते ग्राह्याः । स्वाम्पि तडागानि बह्वाम्पि तडागानि । शोभना आपो यस्मिन् प्रदेशे स्वाप् स्वापौ स्वापः । हे स्वप् इत्यादि ।

२३.[२००]

दृक् - दृग् दृशौ दृशः । स्पृक् - स्पृग् स्पृशौ स्पृशः । स्रक् - स्रग् स्रजौ स्रजः । ऋत्विक् - ऋत्विग् ऋत्विजौ ऋत्विजः । ददृक् - ददृग् ददृक्षौ ददृक्षः । दधृक् - दधृग् दधृक्षौ दधृक्षः । उष्णिक् - उष्णिग् उष्णिहौ उष्णिहः ।

२४.[२०१]

सर्वादेः स्मट् (सू° ८७) । ए ऐ ऐ (सू° २९) । मादू (सू° १९१) अमुष्मै अमूभ्याम् अमीभ्यः ङसिरत् (सू° ७६) अतः (सू° ८८) सवर्णे दीर्घः सह (सू°२४) । मादू (सू°१९१) अमूष्मात् अमूभ्याम् अमीभ्यः । ङस्य (सू° ७७) मादू (सू° १९१) अमुष्य । ओसि (सू° ७८) ए अय् (सू° १८) अमुयोः । सुडामः (सू° ८९) । एस्भि बहुत्वे (सू° ७५) अमीषाम् । ङि स्मिन् (सू° ९०) अमुष्मिन् अमुयोः । एस्भि बहुत्वे (सू° ७५) किलात् (सू° ८१) अमीषु ।

२५.[२१३]

अथानयोर्गोणत्वे रूपविशेषो निरुप्यते । यदा एकत्वे द्वित्वे च युष्मदस्मदी समासार्थस्तु अन्यसंख्यस्तदा त्वन्मदादौ युवावौ च भवतः । वैपरीत्ये तु न स्तः । सिजस्ङेङस्सु परेषु ये आदेशास्ते सदा भवेयुः । तथा चोक्तं पाणिनीये -

समस्यमाने द्वयेकत्ववाचिनी युष्मदस्मदी ।
समासार्थोऽन्यसंख्यश्चेद्युवावौ त्वन्मदावपि ॥
सिजस्ङेङस्सु परत आदेशाः स्युः सदैव ते ।
त्वाहौ यूयवयौ तुभ्यमह्यौ तवममावपि ॥
एते परत्वाद्बाधन्ते युवावौ विषये स्वके ।
त्वन्मदावपि बाधन्ते पूर्वविप्रतिषेधतः ॥

द्वयेकसंख्यः समासार्थो बह्वर्थे युष्मदस्मदी ।
तयोरद्वयेकतार्थत्वान्न युवावौ त्वमावपि ॥

समासश्चान्वये नाम्नम् (सू॰ २४५) इति समाससंज्ञायाम् । अत्यादयः क्रान्ताद्यर्थे द्वितीयया । क्रान्ताद्यर्थे अत्यादयो द्वितीयया सह समस्यन्ते स द्वितीयातत्पुरुषः समासो भवतीति तत्पुरुषः समासः । त्वां मां वा अतिक्रान्त इति विग्रहे । अतित्वम् अत्यहम् । अतित्वाम् अतिमाम् । अतियूयम् अतिवयम् । अतित्वाम् अतिमाम् । अतित्वाम् अतिमाम् । अतित्वान् अतिमान् । अतित्वया अतिमया अतित्वाभ्याम् अतिमाभ्याम् । अतित्वाभिः अतिमाभिः । अतितुभ्यम् अतिमह्यम् । अतित्वाभ्याम् अतिमाभ्याम् । अतित्वभ्यम् अतिमभ्यम् । अतित्वत् अतिमत् । अतित्वाभ्याम् अतिमाभ्याम् । अतित्वत् अतिमत् । अतितव अतिमम । अतित्वयोः अतिमयोः । अतित्वाकम् अतिमाकम् । आमि टेरेत्वं केचिदिच्छन्ति । अतित्वयाम् अतिमयाम् । अतित्वयि अतिमयि । अतित्वयोः अतिमयोः । अतित्वासु अतिमासु । युवाम् आवाम् वा अतिक्रान्त इति विग्रहे । अत्र सिजस्ङेङस्सु । प्राग्वत् । औ अम् औषु तुल्यम् । अतित्वम् अत्यहम् । अतियुवाम् अत्यावाम् । अतियूयम् अतिवयम् । अतियुवाम् अत्यावाम् । अतियुवाम् अत्यावाम् । अतियुवान् अत्यावान् । अतियुवया अत्यवया । अतियुवाभ्याम् अत्यावाभ्याम् । अतियुवाभिः अत्यावाभिः । अतितुभ्यम् अतिमह्यम् । अतियुवाभ्याम् अत्यावाभ्याम् । अतियुवभ्यम् अत्यावभ्यम् । अतियुवत् अत्यावयत् । अतियुवाभ्याम् अत्यावाभ्याम् । अतियुवत् अत्यावत् । अतितव अतिमम । अतियुवयोः अत्यावयोः । अतियुवाकम् अत्यावाकम् । अतियुवयाम् अत्यावयाम् इति केचित् । अतियुवयि अत्यावयि । अतियुवयोः अत्यावयोः । अतियुवासु अत्यावासु । युष्मान् अस्मान् वा अतिक्रान्त इति विग्रहे । अतित्वम् अत्यहम् । अतियुष्मान् अत्यस्मान् । अतियुष्मया अत्यस्मया । अतियुष्माभ्याम् अत्यस्माभ्याम् । अतियुष्माभिः अत्यस्माभिः । अतितुभ्यम् अतिमह्यम् । अतियूयम् अतिवयम् । अतियुष्मान् अत्यस्मान् । अतियुष्मान् अत्यस्मान् । अतियुष्माभ्याम् अत्यस्माभ्याम् । अतियुष्मभ्यम् अत्यस्मभ्यम् । अतियुष्मत् अत्यस्मत् । अतियुष्माभ्याम् अत्यस्माभ्याम् । अतियुष्मभ्यम् अत्यस्मभ्यम् । अतियुष्मत् अत्यस्मत् । अतियुष्माभ्याम् अत्यास्माभ्याम् । अतियुष्मत् अत्यस्मत् । अतितव अतिमम । अतियुष्मयोः अत्यस्मयोः । अतियुष्माकम् अत्यस्मयाम् । इति केचित् । अतियुष्मयि अत्यस्मयि । अतियुष्मयोः अत्यस्मयोः । अतियुष्मासु अत्यस्मासु । अनेनैव प्रकारेण सर्वमुन्नेयम् ।

२६.[२१६]

मम स्वामी भवेत्कृष्णस्तव स्वामी महेश्वरः ।
सम्बोधनपदादग्रे न भवन्ति वसादयः ॥

अग्ने तव देवास्मान्पाहि । पदात्परयोरनयोरेते आदेशा वक्तव्याः । त्वां पातु मां पातु । एते आदेशा अन्वादेशे नित्यमनन्वादेशे वा वक्तव्याः ।

यस्त्वं विश्वस्य जनकस्तस्मै ते विष्णवे नमः ।
अन्वादेशे तु त्वं मे मम वा देवोऽसि ।

विद्यमानपूर्वात्प्रथमान्तात्परयोरनयोरन्वादेशेऽप्येते आदेशा वा वक्तव्याः ।

भक्तस्त्वमप्यहं तेन हरिस्त्वा त्रायते स मा ॥

अचक्षुषज्ञानार्थधातूनां योगे नैते आदेशा वक्तव्याः । चेतसा त्वामीक्षते ध्यायति स्मरतीति वा । चाक्षुषज्ञानार्थधातुयोगे तु भक्तस्त्वा पश्यति यक्षुषा युक्तयुक्तेऽपि निषेधः । भक्तस्तव रुपं धारयति । रुपेण सह सम्बन्धाद्धयानेन युक्तं रुपं तद्रूपेण युक्तस्य तवेत्यस्य युक्तायुक्तत्वात् ।

सम्बोधनपदादग्रे न भवन्ति वसादयः ।

विशेष्यपूर्वं सम्बोधनेतरपूर्वं सम्बोधनं हित्वा अन्यस्मात्सम्बोधनात्परयोर्नैते आदेशा भवन्ति । इति केचित् ।

देवास्मान्पाहि नृहरे विष्णोऽस्मान्पाहि सर्वतः ॥

विशेष्यपूर्वात् । हरे कृपालो नः पाहि । सम्बोधनेतरपूर्वात् । सर्वदारक्षदेव नः ।

२७.[२१७]

युवयोरावयोश्चेशो हरिर्मामेव रक्षतु ।
तुभ्यं मह्यं च देवेशो दद्याच्छं तुभ्यमेव च ॥

च वा ह अह एव । आदिशब्देनेते पञ्चैव गृह्यन्ते नान्ये । नचवाहाहैवयोगे इति पाणिनीयवचनात् । साक्षाद्योगेऽयं निषेधः । न पुनर्युक्तयुक्ते शिवो हरिश्च मे स्वामीत्यादौ ।

२८.[२२५]

अजाश्वाकोकिलाबालावत्सादौ त्रिफलादिके ।
ईबादेरपवादार्थमजादेर्ग्रहणं पृथक् ॥

अजादेश्चेति चकारग्रहणाच्छूद्राकन्यकेत्यादौ प्रथमवयोवाचकत्वेन जातिवाचकत्वेन च ईप् प्राप्तः सोऽजादित्वान्न भवतीति सूचितम् ।

२९.[२२९]

स्वसा दुहिता सीमा पञ्चेत्यादि । पादन्तात्स्त्रियामीप् वा वक्तव्यः । द्विपदी - द्विपात् ।

ऋचि पादन्तादाबेव वक्तव्यो न ईप् । पादः पद् । द्विपदा ऋक् । अन्नन्ताब्दहुव्रीहेर्डाप् वा वाच्यः । बहुसीमा बहुसीमा बहुसीमाः । पक्षे बहुसीमे बहुसीमानौ बहुसीमानः । बहुयज्वा बहुयज्वे बहुयज्वाः । पक्षे बहुयज्वा बहुयज्वानौ बहुयज्वानः । उपधालोपिनोऽन्नताद्बहुव्रीहेरीप् वा । बहुराज्ञी बहुराज्ञ्यौ । पक्षे डाप् । बहुराजा बहुराजे डापोऽप्यभावे बहुराजा बहुराजानौ । संख्यादेर्दाम्न ईप् । द्विदाम्नी ।

३०.[२३०]

अप्यपोरान्नित्यम् ॥६.५७॥

अप्प्रत्ययप्रत्ययसम्बधिनोऽकारात्परस्य शतुर्नित्यं नुमागमो भवति । ईकारे ईपि च परे । ऋ पचन्ती पठन्ती दीव्यन्ती ।

वादीपोः शतुः ॥६.५६॥

अवर्णात्परस्य शतुर्वा नुमागमो भवति ईकारे ईपि च परे । नुदती नुदन्ती ।

३१.[२३४]

सुष्टु आसमन्तादङ्ग स्वाङ्गम् । स्वस्य प्राणिनो अङ्गं स्वाङ्गमित्युक्तेऽङ्गाङ्गिभावेन ज्ञानादेरपि स्वाङ्गत्वं स्यात् । अतः श्वाङ्गलक्षणमाह ।

प्राणिस्यमद्रवं मूर्त्तं स्वाङ्गं स्यादविकारजम् ।
तत्र दृष्टमतत्स्थं चेत्स्थितं तद्वच्च तादृशि ॥

पूर्वार्धस्य प्रत्युदाहरणानि । सुमुखा शाला अप्राणिस्थत्वात् । सुस्वेदा द्रवत्वात् । सुज्ञाना अमूर्तत्वात् । सुशोफा विकारजत्वात् । उत्तरार्धस्योदाहरणानि । सुकेशी-सुकेशा वा रथ्या अप्राणिस्थस्यापि प्राणिनि दृष्टत्वात् । सुस्तनी-सुस्तना वा प्रतिमा प्राणिवत्प्राणिसदृशे स्थितत्वात् । स्वाङ्गत्वेऽपि वा शब्दस्य व्यवस्थितवाचित्वात् । ओष्ठादिषु विकल्पः । वदनादिषु न वक्तव्यः । विम्बोष्ठी - विम्बोष्ठा । चारुकर्णी - चारुकर्णा । समदन्ती - समदन्ता । पद्मवदना मृगनयना । नखमुखयोश्च संज्ञायां नेप् । शूर्पनखा गौरमुखा । नासिकाशब्दात्केवलान्नेप । नासिका ।

३२.[२३८]

तत्र क्रियासिद्ध्यु पकारकं कारकम् । तच्च षड्विधम् ।

कर्ता कर्म च करणं संप्रदान तथैव च ।
अपादानाधिकरणे चेत्याहुः कारकाणि षट् ॥
उक्तानुक्ततया द्वेधा कारकाणि भवन्ति षट् ।
उक्ते तु प्रतमैव स्यादनुक्ते तु यथाक्रमम् ॥

तानि विभक्तिरित्यभिधीयते ।

३३.[२४०]

कर्तुरीप्सिततमं कर्म (पा॰ सू॰ १/४/२९) । कर्तुः क्रियया आप्तुमिष्टतमं कारकं कर्मसंज्ञं स्यात् । हरिं भजति । तथायुक्तं चानीप्सितम् (पा॰ सू॰ १/४/५०) । ईप्सिततमवत्क्रियया युक्तमनीप्सितमपि कारकं कर्मसंज्ञं स्यात् । तच्चानीप्सितं द्विविधम् । द्वेष्यमितरच्च । विषं भुङ्क्ते । ग्रामं गच्छन्तृणं स्पृशति । तच्च कर्मकारकं चतुर्विधम् । उत्पाद्यं आप्यं संस्कार्यं विकार्यं च । उत्पत्यर्हमुत्पाद्यं वा यदभूत्वा भावि तदुत्पाद्यम् । यत्सिद्धमेव प्राप्यते तदाप्यम् । संस्कारो नाम प्राक्तनकर्मजो गुणः कश्चिद्गुणातिशयो वा गुणाधानं मलापकर्षो वा इति चतुर्विधः संस्कारः । संस्कारमर्हतीति संस्कार्यम् । विकारो नाम पूर्वावस्थापरित्यागेनावस्थान्तरप्राप्तिः ।

३४.[२४०]

परितः समयानिकषाहाप्रतियोगेऽपि । परितः कृष्णं गोपाः । निकषा समया सामीप्ये ।

समया ग्रामं उपवनानि वर्तन्ते । निकषा ग्रामं निहतः शत्रुः । हा कृष्णाभक्तम् । तस्य शोचत इत्यर्थः । बुभुक्षितं न प्रतिभाति किंचित् । लक्षणेत्थंभूताख्यानभागवीप्सासु प्रतिपर्यनवः । एष्वर्थेषु विषयभूतेषु प्रत्यादयः कर्मप्रवचनीयसंज्ञाः स्युः । कर्मप्रवचनीययुक्ते द्वितीया । एतेन योगे द्वितीया स्यात् । लक्षणे । वृक्षं प्रतिपरिअनु वा विद्योतते विद्युत् । इत्थंभूताख्याने । भक्तो विष्णुं प्रतिपरिअनु वा । भागे । लक्ष्मीर्हरिं प्रतिपरिअनु वा हरेर्भागः इत्यर्थः । वीप्सायाम् । वृक्षं वृक्षं प्रतिपरिअनु वा संचरित ।

३५.[२४०]

ददाति दण्डं पुरुषो महीपतेर्न चातिभक्त्या न च दानकाम्यया ।
यद्दीयते वासनया सुपात्रे तत्संप्रदानं कथितं कवीन्द्रैः ॥

अनभिहिते इत्येव । दानीयो विप्रः । क्वचित्सम्यक्श्रेयोवुद्ध्यभावेऽपि चतुर्थी । व्याजेन राघवे करमिति महाप्रयोगदर्शनात् । तच्च संप्रदानं त्रिविधम् । प्रेरकमनिराकर्त्रनुमन्तृ चेति ।

त्यागेन कर्मणा व्याप्तं प्रेरकं चानुमन्तृ च ।
अनिराकर्तृ चेत्येतत्संप्रदानं त्रिधा स्मृतम् ॥

देहीति प्रेरयति तत्प्रेरकम् । यथा बटवे भिक्षां ददाति । यत्तु इदमहं ददामीत्युक्तेऽनुमन्यते ओमित्याह तदनुमन्तृ । यथा शिष्यो गुरवे गां ददाति । यत्तु नानुमन्यते न निराकारोति तदनिराकर्तृ । यथा सूर्यायार्घ्यं ददाति । क्रियया यमभिप्रैति सोऽपि संप्रदानम् । पत्ये शेते ।

३६.[२४०]

विश्लेषो नाम संयोगपूर्वको विभागः । अधाराधेययोर्मध्ये आधारत्वेन ज्ञापमानः सोऽवधिः । अधीयतेऽनेनासौ आधारः । आधातुं योग्यः आधेयः ।

३७.[२४०]

भेद्यभेदकयोः श्लिष्टः सम्बन्धोऽन्योन्युमुच्यते ।
द्विष्ठो यद्यपि सम्बन्धः षष्ठ्युत्पत्तिस्तु भेदकात् ॥
भेद्यं विशेष्यमित्याहुर्भेदकं तु विशेषणम् ।
विशेष्यं तु प्रधानं स्यादप्रधानं विशेषणम् ॥

प्रधानाप्रधानयोर्मध्येऽप्रधाने षष्ठी । क्रियान्वयि प्रधानं क्रियानन्वय्यप्रधानम् ।

३८.[२४०]

सेव्यसेवकभावसम्बन्धः पूज्यपूजकभावसम्बन्धो बोध्यबोधकभावसम्बन्धो वाच्यवाचकभावसंबन्ध इति संबन्धश्चतुर्विधः ।

३९.[२४१]

अधिशीङ्स्थासां कर्म (पा॰ १/४/४६)। अधिपूर्वाणामेषामाधारः कर्मसंज्ञः स्यात्। अधिशेते अधितिष्ठति अध्यास्ते वा वैकुण्ठं हरिः। अभिनिविशश्च (पा॰ १/४/४७)। अभिनीत्येतत्संघातपूर्वस्य विशतेर्धातोराधारः कर्मसंज्ञाः स्यात्। ग्रामं अभिनिविशते। उपान्वध्याङ्वसः (पा॰ १/४/४८)। उपादिपूर्वस्य वसतेराधारः कर्मसंज्ञाः स्यात्। अवसथ्यं आवसति उपवसति अनुवसति अधिवसति।

४०.[२४४]

स्वतन्त्रः कर्ता (पा॰ १/४/५४)। क्रियायां स्वातन्त्र्येण विवक्षितोऽर्थः कर्ता स्यात्। प्रधानीभूतधात्वर्थाश्रयः कर्ता। साधकतमं करणम् (पा॰ १/४/४२)। क्रियासिद्धौ प्रकृष्टोपकारकं करणसंज्ञं स्यात्। कर्तृकरणयोस्तृतीया (पा॰ २/३/१८)। अनभिहिते कर्तरि करणे तृतीया स्यात्। अकथितं च (पा॰ १/४/५१)। अपादानादिविशेषैरविवक्षितं कारकं कर्मसंज्ञं स्यात्।

दुह्याच्पच्दण्ड्रुधिप्रच्छिचिब्रूशासुजिमथ्मुषाम्।
कर्मयुक् स्यादकथितं तथा स्यान्नीहृकृष्वहाम्॥

दुहादीनां द्वादशानां तथा नीप्रभृतीनां चतुर्णां कर्मणा यद्युज्यते तदेवाकथितं कर्मेति परिगणनं कर्तव्यमित्यर्थः। गां दोग्धि पयः। बलिं याचते वसुधाम्। अविनीतं विनयं याचते। तण्डुलानोदनं पचति। गर्गान् शतं दण्डयति। व्रजमरुणाद्धि ग्राम्। माणवकं पन्थानं पृच्छति। वृक्षमवचिनोति फलानि। माणवकं धर्मं ब्रूते शास्ति वा। शतं जयति देवदत्तम्। सुधां क्षीरधिं मथ्नाति। देवदत्तं शतं मुष्णाति। ग्राममजां नयति हरति कर्षति वहति वा। अर्थनिबन्धनेयं संज्ञा। बलिं भिक्षते वसुधाम्। माणवकं धर्मं भाषते अभिधत्ते वक्तीत्यादि। अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञः स्यादिति वाच्यम्। कुरून्स्वपिति मासमास्ते गोदोहमास्ते क्रोशमास्ते। गतिबुद्धिप्रत्यवसानार्थशब्द-कर्माकर्मकाणामणि कर्ता स णौ (पा॰ १/४/५२)। गत्याद्यर्थानां शब्दकर्मकाणामकर्मकाणां चाणौ यः कर्ता स णौ कर्म स्यात्।

शत्रूनगमयत्स्वर्गं वेदार्थं स्वानबोधयत्।
आशयच्चामृतं देवान्वेदमध्यापयद्विधिम्॥
आसयत्सलिले पृथ्वीं यः स मे श्रीहरिर्गतिः।
गौणे कर्मणि दुह्यादेः प्रधाने नीहृकृष्वहाम्॥
बुद्धिभक्षार्थयोः शब्दकर्मणां च निजेच्छया।
प्रयोज्यकर्मण्यन्येषां ण्यन्तानां लादयो मताः॥

गौर्दुह्यते पयः। अजा ग्रामं नीयते। बोध्यते माणवकं धर्मः माणवको धर्ममिति वा। देवदत्तो ग्रामं गम्यते। अकर्मकाणां कालादिकर्मणां च कर्मणि भावे च लाकार इष्यते। मासो मासं

वा आस्यते देवदत्तेन । णिजन्तात्तु प्रयोज्ये प्रत्ययः । मासमास्यते माणवकः । तत्प्रयोजको हेतुश्च । कर्तुः प्रयोजकः कर्तृसंज्ञो हेतुसंज्ञश्च स्यात् । स्वार्थं परित्यज्य अन्यार्थाभिधायिमुपसर्जनत्वम् । क्रियाजन्यफलशालित्वं कर्मत्वम् । साक्षात्सम्बन्धेन क्रियान्वयित्वं मुख्यत्वम् । परम्परासम्बन्धेन क्रियान्वयित्वं गौणत्वम् ।

४१.[२४५]

अव्ययस्य अव्ययेन वा भवनं सोऽव्ययीभावः ।१। स एवाग्रिमः पुरुषप्रधानं यस्यासौ तत्पुरुषः ।२। द्वन्द्वायते उभयपदार्थो येनासौ द्वन्द्वः ।३। बहु समातिरिक्तं व्रीहिः प्रधानं यस्मिन्नसौ बहुव्रीहिः ।४। कर्म भेदकं धारयतीति कर्मधारयः ।५। द्वाभ्यां गच्छती द्विगुः ।

४२.[२४५]

इदमेकस्मिन्समसिते पदेऽनेकसमासप्राप्तिस्तद्विषयम् । निषादस्थपतिं याजयेदित्यत्र तत्पुरुषबहुव्रीकर्मधारयप्राप्तौ सत्यां निर्णयमाह । समानाकरणव्यधिकरणयोर्मध्ये समानाधिकरणो बलवान् । एकविभक्त्यन्तमेवार्थनिष्ठत्वं समानाधिकरण्यम् । नीलं च तदुत्पलं च नीलोत्पलम् । भिन्नविभक्त्यन्तं भिन्नार्थनिष्ठत्वं वैयाधिकरण्यम् ।

४३.[२५१]

यावदवधारणे (पा° २/१/८) । अवधारणार्थे यावच्छब्दो नित्यं समस्यते । आङ्मर्यादाऽभिविध्योः (पा° २/१/१३) । मर्यादायामभिविधौ च आङ् वा समस्यते । पाटलिपुत्रं मर्यादीकृत्येत्यापाटलिपुत्रम् । बालानभिव्याप्येत्याबालम् । तेन विनेति मर्यादा । तेन सहेत्यभिविधिः । परेमध्ये षष्ठ्या वा (पा° २/१/१८) । पारमध्यशब्दौ षष्ठ्या वा समस्येते । एदन्तौ निपातौ सूत्रात् । प्रथमानिर्दिष्टं समास उपसर्जनम् (पा° १/२/४३) । समासशास्त्रे प्रथमानिर्दिष्टमुपसर्जनसंज्ञं स्यात् । उपसर्जनं पूर्वम् (पा° २/२/३०) । समासे उपसर्जनं प्राक् प्रयोज्यम् । गङ्गायाः पारे इति पारेगङ्गं - गङगापारे । गङ्गायाः मध्ये इति मध्येगङ्गम् - गङ्गामध्ये ।

४४.[२५३]

नञ् (पा° २/२/६) । नञ् सुवन्तेन समस्यते । नञ अभयार्थत्वं प्रसिद्धम् । तथा योक्तं वार्तिककारेण-

उभौ नञौ समाख्यातौ पर्युदासप्रसह्यकौ ।
पर्युदासः सदृग्ग्राही प्रसह्यस्तु निषेधकृत् ॥
प्राधान्यं तु विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रोत्तरगतो न नञ् ॥
अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
प्रसह्यप्रतिषेधोऽयं क्रियया सह यत्र नञ् ॥

४५.[२६०]

धनं करे यस्य सः करधनः । मतिः कृष्णे यस्य सः कृष्णमतिः । बुद्धिर्धर्मे यस्य सः धर्मबुद्धिः । कण्ठे हारो यस्य सः कण्ठहारः । करे कंकणं यस्यासौ करकंकणः । भुवने कीर्तिर्यस्यासौ भुवनकीर्तिः । प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ वक्तव्यो । क्तक्तवतू निष्ठा (पा° १/१/२६) । क्तक्तवतू प्रत्ययौ निष्ठासंज्ञौ स्तः । चक्रं पाणौ यस्य सः चक्रपाणिः । दण्डः पाणौ यस्य सः दण्डपाणिः । अस्युद्यतः उद्यतासिरित्यपि भवति । प्रियादीनां वा । प्रियगुडः गुडप्रियः । इन्द्वादिभ्यश्च । इन्द्वादिभ्यः शब्देभ्यः सप्तम्यन्तस्य पूर्वनिपातो न । इन्दुः शेखरे यस्यासाविन्दुशेखरः ।

४६.[२६०]

केवलात्किम् । परमः स्वो धर्मो यस्य सः परमस्वधर्मः । जायाया निङादेशो बहुव्रीहौ वक्तव्यो यलोपश्च । लक्ष्मीजानिः । उत्पूतिसुसुरभिभ्यो गन्धशब्दस्येकारान्तादेशो बहुव्रीहौ वक्तव्यः । उद्गन्धिः । पूतिगन्धिः । पूतिगन्धिः । सुगन्धिः । सुरभिगन्धिः । आगन्तुकस्यैकवचनान्तस्य वा । सुगन्धिः आपणः - सुगन्धो वा । अल्पाख्यायां च (पा° ४/१/१३६) । अल्पपर्यायो गन्धशब्दः । सूपोऽल्पो यस्मिन् तत्सूपगन्धि भोजनम् । घृतगन्धि । वेति केचित् । सूपगन्धम् । घृतगन्धम् । उपमानाच्च । पद्मस्येव गन्धो यस्येति पद्मगन्धिः । मतान्तरे विकल्पः । ऊधसोऽनङ् (पा° ५/४/१३१) । ऊधोन्ताद्बहुव्रीहेरनङादेशः स्यात्स्त्रियाम् । कुण्डोघ्नी गौः । पुंसि तु कुण्डोधाः गोगणः ।

४७.[२६२]

अभाषितपुंस्कस्य च न पुंवत् । गङ्गाभार्यः । कोपधपूरणीसंज्ञानां च न पुंवत् । पाचकीभार्यः पञ्चमीभार्यः दत्ताभार्यः । जातिवाचकात्स्वाङ्गवाचकाद्यईप्तदन्तस्य न पुंवदमानिनि । ब्राह्मणीभार्यः । सुकेशीभार्यः । अमानिनीति किम् । ब्राह्मणमानिनी । युट्वर्जितरक्तविकारार्थ-वर्जितेति किम् । वैयाकरणभार्यः काषायकन्थः हैममुद्रिकः । वाग्रहणादियं विवक्षा ।

४८.[२७४]

ढकि लोपः । मातृष्वसुरन्तस्य लोपः स्याड्ढकि । अत एव ढक् । आयनेयीनीयियः फढखछघां प्रत्ययवादीनाम् । प्रत्ययादिभूतानां फादीनां क्रमादायन्नादय आदेशाः स्युः । आयन् एय् ईन् ईय् इय् एते आयन्नादयः । किति च । किति तद्धिते परे अचामदेरचो वृद्धिः स्यात् । पैतृष्वसेयः । मातृष्वसुश्च । पितृष्वसुर्यदुक्तं तदस्यापि स्यात् । मातृष्वसेयः । मातृपितृभ्यां पितरि डामहच् । आभ्यां परो डामहच् प्रत्ययो भवति । मातुः पिता मातामहः । पितुः पिता पितामहः ।

४९.[२८३]

चकारात्समूहो प्रत्ययान्तरमपि । तेन हस्तिनां समूहो हास्तिकम् । धेनूनां समूहो धैनुकम् । अत्र कप्रत्ययः । तस्य णित्वादादिवृद्धिः । अचित्तवाचकादिकः । कवचानां समूहः कावचिकम् । अपूपानां समूहः आपूपिकम् । शुष्कुलीनां समूहः शाष्कुलिकम् । कवचित् शब्दादिकः । कवचिनां समूहः कावचिकम् । माणिकाया ण्यः । गणिकानां समूहो गाणिक्यम् । केदाराघञ् च । चकारादिकः केदाराणां समूहः कैदार्यम् । कैदारिकम् । युवत्यादेरण् । युवतीनां समूहो यौवतम् । भिक्षाणां समूहो भैक्षम् । पाशादिभ्यो यः । स च स्त्रियाम् । पाशानां समूहः पाश्या । वातानां समूहो वात्या । रथानां रमूहो रथ्या । खलानां समूहः खल्या । खलगोरथेभ्य इनित्रकट्याः । खलिनी । रथानां समूहो रथकट्या इत्यपि । गवां समूहो गोत्रा । गव्येत्यादि प्रयोगा ऊह्याः ।

५०.[२८४]

फलबर्हरथेभ्य इनेनौ वा वक्तव्यौ । फलमस्यास्तीति फलिनः - फली । बर्हमस्यास्तीति बर्हिणः -बर्ही । रथोऽस्यास्तीति रथिनः - रथी । बलवाताभ्यामूलः बलूलः वातूलः । वातातिसाराभ्यां किन् । वातकी । अतिसारकी । ऊर्णाहं शुभंभ्यो युः । अस्त्यर्थे । ऊर्णायुः । अहंयुः । शुभंयुः । अर्णः केशयोर्वः । ऊर्णसः सलोपश्च । अर्णवः । केशवः । शकंभ्यां बजायुस्तितुतयसः । आभ्यामेते प्रत्ययाः स्युरस्त्यर्थे । शं विद्यते यस्यासौ शंबः । शंभः । शंयुः । शंतिः । शंतुः । शंतः । शंयः । किं विद्यते यस्यासौ कंबः । कंभः । कंयुः । कंतिः । कंतुः । कंतः । कंयः । इत्यादि । लोमादिभ्यः शः । लोमशः । पामादेर्नः । पामनः । अङ्गना । पिच्छादेरिलच् । पिच्छिलः । फेनादिभ्य इलच् । फेनिलः । तन्दिवलिचटिभ्यो भः । तुन्दिभः । वलिभः । चटिभः । कृष्यादिभ्यो वलच् दीर्घश्च । कृषीवलः । प्राज्ञार्चाश्रद्धावृत्तिभ्योऽण् । प्रज्ञाऽस्यास्तीति प्राज्ञः । आर्चः । श्राद्धः । वार्ताः । शृङ्गवृन्दाभ्यामारकच् । प्रशस्तं शृङ्गमस्यास्तीति शृङ्गारकः । प्रशस्तं वृन्दमस्यास्तीति वृन्दारकः । मध्वादे रः । मधुरः । मुखरः । शुषिरः । रन्ध्रवानित्यर्थः । कुञ्जरः । कुञ्जो हस्तिहनुः । सिध्मादेर्लः । सिध्मास्यास्तीति सिध्मलः । चूडास्यास्तीति चूडालः ।

••••••••••••••••••